শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ সপ্তমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ সপ্তমঃ সর্গঃ ॥

### ভাৱিনঃ শ্রীরামাভিষেকস্য ৱৃত্তমাকর্ণ্য খিন্নযা মন্থরযা কৈকেয্যা হৃদযে ভেদভাৱস্যোৎপাদনং প্রীতযা কৈকেয্যা কুব্জাযৈ পুরস্কাররূপেণাভূষণস্য দানং ৱরং ৱরযিতুং প্রেরণং চ

জ্ঞাতিদাসী যতো জাতা কৈকেয্যা তু সহোষিতা।
প্রাসাদং চন্দ্রসঙ্কাশমারুরোহ যদৃচ্ছযা॥ **2.7.1** ॥

সিক্তরাজপথাং কৃৎস্নাং প্রকীর্ণকমলোৎপলাম্।
অযোধ্যাং মন্থরা তস্মাৎ প্রাসাদাদন্ৱৱৈক্ষত॥ **2.7.2** ॥

পতাকাভির্ৱরার্হাভির্ধ্ৱজৈশ্চ সমলঙ্কৃতাম্।
সিক্তাং চন্দনতোযৈশ্চ শিরঃস্নাতজনৈর্যুতাম্॥ **2.7.3** ॥

মাল্যমোদকহস্তৈশ্চ দ্ৱিজেন্দ্রৈরভিনাদিতাম্।
শুক্লদেৱগৃহদ্ৱারাং সর্ৱৱাদিত্রনাদিতাম্॥ **2.7.4** ॥

সম্প্রহৃষ্টজনাকীর্ণাং ব্রহ্মঘোষনিনাদিতাম্।
প্রহৃষ্টৱরহস্ত্যশ্ৱাং সম্প্রণর্দিতগোৱৃষাম্॥ **2.7.5** ॥

হৃষ্টপ্রমুদিতৈঃ পৌরৈরুচ্ছ্রিতধ্ৱজমালিনীম্।
অযোধ্যাং মন্থরা দৃষ্ট্ৱা পরং ৱিস্মযমাগতা॥ **2.7.6** ॥

সা হর্ষোৎফুল্লনযনাং পাণ্ডুরক্ষৌমৱাসিনীম্।
অৱিদূরে স্থিতাং দৃষ্ট্ৱা ধাত্রীং পপ্রচ্ছ মন্থরা॥ **2.7.7** ॥

উত্তমেনাভিসংযুক্তা হর্ষেণার্থপরা সতী।
রামমাতা ধনং কিং নু জনেভ্যঃ সম্প্রযচ্ছতি॥ **2.7.8** ॥

অতিমাত্রং প্রহর্ষঃ কিং জনস্যাস্য চ শংস মে।
কারযিষ্যতি কিং ৱাপি সম্প্রহৃষ্টো মহীপতিঃ॥ **2.7.9** ॥

ৱিদীর্যমাণা হর্ষেণ ধাত্রী তু পরযা মুদা।
আচচক্ষেঽথ কুব্জাযৈ ভূযসীং রাঘৱে শ্রিযম্॥ **2.7.10** ॥

শ্ৱঃ পুষ্যেণ জিতক্রোধং যৌৱরাজ্যেন চানঘম্।
রাজা দশরথো রামমভিষেক্তা হি রাঘৱম্॥ **2.7.11** ॥

ধাত্র্যাস্তু ৱচনং শ্রুৎৱা কুব্জা ক্ষিপ্রমমর্ষিতা।
কৈলাসশিখরাকারাৎ প্রাসাদাদৱরোহত॥ **2.7.12** ॥

সা দহ্যমানা ক্রোধেন মন্থরা পাপদর্শিনী।
শযানামেৱ কৈকেযীমিদং ৱচনমব্রৱীৎ॥ **2.7.13** ॥

উত্তিষ্ঠ মূঢে কিং শেষে ভযং ৎৱামভিৱর্ততে।
উপপ্লুতমঘৌঘেন নাত্মানমৱবুধ্যসে॥ **2.7.14** ॥

অনিষ্টে সুভগাকারে সৌভাগ্যেন ৱিকত্থসে।
চলং হি তৱ সৌভাগ্যং নদ্যাঃ স্রোত ইৱোষ্ণগে॥ **2.7.15** ॥

এৱমুক্তা তু কৈকেযী রুষ্টযা পরুষং ৱচঃ।
কুব্জযা পাপদর্শিন্যা ৱিষাদমগমৎ পরম্॥ **2.7.16** ॥

কৈকেযী ৎৱব্রৱীৎ কুব্জাং কচ্চিৎ ক্ষেমং ন মন্থরে।
ৱিষণ্ণৱদনাং হি ৎৱাং লক্ষযে ভৃশদুঃখিতাম্॥ **2.7.17** ॥

মন্থরা তু ৱচঃ শ্রুৎৱা কৈকেয্যা মধুরাক্ষরম্।
উৱাচ ক্রোধসংযুক্তা ৱাক্যং ৱাক্যৱিশারদা॥ **2.7.18** ॥

সা ৱিষণ্ণতরা ভূৎৱা কুব্জা তস্যাং হিতৈষিণী।
ৱিষাদযন্তী প্রোৱাচ ভেদযন্তী চ রাঘৱম্॥ **2.7.19**॥

অক্ষযং সুমহদ্ দেৱি প্রৱৃত্তং ৎৱদ্ৱিনাশনম্।
রামং দশরথো রাজা যৌৱরাজ্যেঽভিষেক্ষ্যতি॥ **2.7.20**॥

সাস্ম্যগাধে ভযে মগ্না দুঃখশোকসমন্ৱিতা।
দহ্যমানানলেনেৱ ৎৱদ্ধিতার্থমিহাগতা॥ **2.7.21**॥

তৱ দুঃখেন কৈকেযি মম দুঃখং মহদ্ ভৱেৎ।
ৎৱদ্ৱৃদ্ধৌ মম ৱৃদ্ধিশ্চ ভৱেদিহ ন সংশযঃ॥ **2.7.22**॥

নরাধিপকুলে জাতা মহিষী ৎৱং মহীপতেঃ।
উগ্রৎৱং রাজধর্মাণাং কথং দেৱি ন বুধ্যসে॥ **2.7.23**॥

ধর্মৱাদী শঠো ভর্তা শ্লক্ষ্ণৱাদী চ দারুণঃ।
শুদ্ধভাৱেন জানীষে তেনৈৱমতিসন্ধিতা॥ **2.7.24**॥

উপস্থিতঃ প্রযুঞ্জানস্ত্ৱযি সান্ত্ৱমনর্থকম্।
অর্থেনৈৱাদ্য তে ভর্তা কৌসল্যাং যোজযিষ্যতি॥ **2.7.25**॥

অপৱাহ্য তু দুষ্টাত্মা ভরতং তৱ বন্ধুষু।
কাল্যে স্থাপযিতা রামং রাজ্যে নিহতকণ্টকে॥ **2.7.26**॥

শত্রুঃ পতিপ্রৱাদেন মাত্রেৱ হিতকাম্যযা।
আশীৱিষ ইৱাঙ্কেন বালে পরিধৃতস্ত্ৱযা॥ **2.7.27**॥

যথা হি কুর্যাচ্ছত্রুর্ৱা সর্পো ৱা প্রত্যুপেক্ষিতঃ।
রাজ্ঞা দশরথেনাদ্য সপুত্রা ৎৱং তথা কৃতা॥ **2.7.28**॥

পাপেনানৃতসান্ত্ৱেন বালে নিত্যং সুখোচিতা।
রামং স্থাপযতা রাজ্যে সানুবন্ধা হতা হ্যসি॥ **2.7.29**॥

সা প্রাপ্তকালং কৈকেযি ক্ষিপ্রং কুরু হিতং তৱ।
ত্রাযস্ৱ পুত্রমাত্মানং মাং চ ৱিস্মযদর্শনে॥ **2.7.30** ॥

মন্থরাযা ৱচঃ শ্রুৎৱা শযনাৎ সা শুভাননা।
উত্তস্থৌ হর্ষসম্পূর্ণা চন্দ্রলেখেৱ শারদী॥ **2.7.31** ॥

অতীৱ সা তু সন্তুষ্টা কৈকেযী ৱিস্মযান্ৱিতা।
দিৱ্যমাভরণং তস্যৈ কুব্জাযৈ প্রদদৌ শুভম্॥ **2.7.32** ॥

দত্ত্বা ৎৱাভরণং তস্যৈ কুব্জাযৈ প্রমদোত্তমা।
কৈকেযী মন্থরাং হৃষ্টা পুনরেৱাব্রৱীদিদম্॥ **2.7.33** ॥

ইদং তু মন্থরে মহ্যমাখ্যাতং পরমং প্রিযম্।
এতন্মে প্রিযমাখ্যাতং কিং ৱা ভূযঃ করোমি তে॥ **2.7.34** ॥

রামে ৱা ভরতে ৱাহং ৱিশেষং নোপলক্ষযে।
তস্মাৎ তুষ্টাস্মি যদ্ রাজা রামং রাজ্যেঽভিষেক্ষ্যতি॥ **2.7.35** ॥

ন মে পরং কিঞ্চিদিতো ৱরং পুনঃ
প্রিযং প্রিযার্হে সুৱচং ৱচোঽমৃতম্।
তথা হ্যৱোচস্ত্বমতঃ প্রিযোত্তরং
ৱরং পরং তে প্রদদামি তং ৱৃণু॥ **2.7.36** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
অযোধ্যাকাণ্ডে সপ্তমঃ সর্গঃ ॥